# Chapter 12

Bhakti Yoga

## अथ द्वादशोऽध्यायः

**अर्जुन उवाच ।**
**एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।**
**ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१२-१॥**

arjuna uvāca |
evaṃ satatayuktā ye bhaktās tvāṃ paryupāsate |
ye cāpy akṣaram avyaktaṃ teṣāṃ ke yogavittamāḥ ||12-1||

**श्रीभगवानुवाच ।**
**मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।**
**श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥१२-२॥**

śrībhagavān uvāca |
mayy āveśya mano ye māṃ nityayuktā upāsate |
śraddhayā parayopetās te me yuktatamā matāḥ ||12-2||

**ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।**
**सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम् ॥१२-३॥**

ye tv akṣaram anirdeśyam avyaktaṃ paryupāsate |
sarvatragam acintyaṃ ca kūṭastham acalaṃ dhruvam ||12-3||

**संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।**
**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ॥१२-४॥**

saṃniyamyendriyagrāmaṃ sarvatra samabuddhayaḥ |
te prāpnuvanti mām eva sarvabhūtahite ratāḥ ||12-4||

**क्लेशो ऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।**
**अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥१२-५॥**

kleśo 'dhikataras teṣām avyaktāsaktacetasām |
avyaktā hi gatir duḥkhaṃ dehavadbhir avāpyate ||12-5||

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते ॥१२-६॥**

ye tu sarvāṇi karmāṇi mayi saṃnyasya matparāḥ |
ananyenaiva yogena māṃ dhyāyanta upāsate ||12-6||

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥१२-७॥

teṣām ahaṃ samuddhartā mṛtyusaṃsārasāgarāt |
bhavāmi nacirāt pārtha mayy āveśitacetasām ||12-7||

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥१२-८॥

mayy eva mana ādhatsva mayi buddhiṃ niveśaya |
nivasiṣyasi mayy eva ata ūrdhvaṃ na saṃśayaḥ ||12-8||

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥१२-९॥

atha cittaṃ samādhātuṃ na śaknoṣi mayi sthiram |
abhyāsayogena tato mām icchāptuṃ dhanaṃjaya ||12-9||

अभ्यासे ऽप्यसमर्थो ऽसि मत्कर्मपरमो भव ।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१२-१०॥

abhyāse 'py asamartho 'si matkarmaparamo bhava |
madartham api karmāṇi kurvan siddhim avāpsyasi ||12-10||

अथैतदप्यशक्तो ऽसि कर्तुं मद्योगमाश्रितः ।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥१२-११॥

athaitad apy aśakto 'si kartuṃ madyogam āśritaḥ |
sarvakarmaphalatyāgaṃ tataḥ kuru yatātmavān ||12-11||

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२-१२॥

śreyo hi jñānam abhyāsāj jñānād dhyānaṃ viśiṣyate |
dhyānāt karmaphalatyāgas tyāgāc chāntir anantaram ||12-12||

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥१२-१३॥

adveṣṭā sarvabhūtānāṃ maitraḥ karuṇa eva ca |
nirmamo nirahaṃkāraḥ samaduḥkhasukhaḥ kṣamī ||12-13||

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१२-१४॥

saṃtuṣṭaḥ satataṃ yogī yatātmā dṛḍhaniścayaḥ ।
mayy arpitamanobuddhir yo madbhaktaḥ sa me priyaḥ ॥12-14॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१२-१५॥

yasmān nodvijate loko lokān nodvijate ca yaḥ ।
harṣāmarṣabhayodvegair mukto yaḥ sa ca me priyaḥ ॥12-15॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१२-१६॥

anapekṣaḥ śucir dakṣa udāsīno gatavyathaḥ ।
sarvārambhaparityāgī yo madbhaktaḥ sa me priyaḥ ॥12-16॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१२-१७॥

yo na hṛṣyati na dveṣṭi na śocati na kāṅkṣati ।
śubhāśubhaparityāgī bhaktimān yaḥ sa me priyaḥ ॥12-17॥

समः शत्रौ च मित्रे च तथा मानावमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१२-१८॥

samaḥ śatrau ca mitre ca tathā mānāvamānayoḥ ।
śītoṣṇasukhaduḥkheṣu samaḥ saṅgavivarjitaḥ ॥12-18॥

तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केन चित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१२-१९॥

tulyanindāstutir maunī saṃtuṣṭo yena kena cit ।
aniketaḥ sthiramatir bhaktimān me priyo naraḥ ॥12-19॥

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्ते ऽतीव मे प्रियाः ॥१२-२०॥

ye tu dharmyāmṛtam idaṃ yathoktaṃ paryupāsate ।
śraddadhānā matparamā bhaktās te 'tīva me priyāḥ ॥12-20॥



ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः